M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. V/19

Title : Tarka Bhasha

V/19

In Complete

Tarka	Bhasha		: Title
		Keshava Misra	: Author
			: Editor
			: Year, Vols.
810			: Publisher
V/19	Presented by Pt. V. R. Trivedi		: Remarks

तर्कभाषामूल

॥श्रीगणेशायनमः॥ बालोपियोन्यायनयेप्रवेशमल्पेनवांछत्यलसश्रुतेन। संक्षिप्तयुक्त्यन्वितर्कभाषा प्रकाश्यते
तस [redacted]कृतेमयैषा॥१॥ प्रमाणप्रमेयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजा
तिनिग्रहस्थानानांतत्वज्ञानान्निःश्रेयसाधिगमइतिन्यायस्यादिमंसूत्रम्। अस्यार्थः। प्रमाणादितत्वज्ञाना
न्मोक्षप्राप्तिर्भवतीति। नचप्रमाणादीनांतत्वज्ञानंसमाकलतावभव[redacted]तियावदेषामुद्देशलक्षणपरीक्षान
क्रियंते। यदाहभाष्यकारः। त्रिविधाचास्यशास्त्रस्यप्रवृत्तिः। उद्देशोल[redacted]क्षणंपरीक्षाचेति। उद्देशस्तुना
ममात्रेणवस्तुसंकीर्तन[redacted]म्। तच्चतस्मिन्नेवसूत्रेकृतं। लक्षणंत्वसाधारणधर्मवचनं। यथागोःसास्नादि
५५७ मत्वं। यथालक्षितस्यैव[redacted] तल्लक्षणमुप[redacted]घ्यतेनवेतिविचारःपरीक्षा। तेनैवलक्षणपरीक्षेप्रमाणादी
नांतत्वज्ञानार्थंकर्तव्ये। तत्रापिप्रथममुद्दिष्टस्यप्रमाणस्यतावल्लक्षणमुच्यते। प्रमाकरणंप्रमाणम्। अ
णं२ त्रप्रमा[redacted]लक्ष्यं। प्रमाकरणंलक्षणम्। ननुप्रमायाकरणंचेत्प्रमाणं तर्हितस्यफलंवक्तव्यं। करणस्यफल
वत्वनियमात्। सत्यं। प्रमैवफलंसाध्यमित्यर्थः। यथाछिदाकरणस्यपरशोःछिदैवफलं। कापुनःप्रमा। यस्याःक २
रणंप्रमाणमुच्यते। यथार्थानुभवःप्रमा। यथार्थइति। अयथार्थानां[redacted]संशयविपर्ययतर्कज्ञानानांनिरा

तेर

सः। अनुभवइतिस्मृतेर्निरासः। अनुभवोनामस्मृतिव्यतिरिक्तंज्ञानं। किंपुनःकरणं। साधकतमंकरणम्। अतिशयितं
साधकंसाधकतमं। प्रकृष्टंकारणमित्यर्थः। ननुसाधकंकारणमितिपर्यायस्तदेवनज्ञा[redacted]यते तत्किंकारणमितिउच्यते। य
स्यकार्यात्पूर्वभावोनियतोऽनन्यथासिद्धस्तत्कारणं[redacted]। यथातंतुवेमादिकंपट
त४ स्य। यद्यपिपटोत्पत्तौरासभादेर्दैवादागतस्यपूर्वभावोविद्यतेतथापिनासौनियतः। तंतुरूपस्यनियतपूर्वभावोऽस्ते
दपित्वन्यथासिद्धः। पटरूपजननेनोपक्षीणत्वात्। पटंप्रत्यपिकारणत्वेकल्पनागौरवात्। तेनान्यथासिद्धनियतपूर्वभा
वित्वंकारणत्वं। अनन्यथासिद्धनियतपश्चाद्भावित्वंकार्यत्वं। यत्तुकश्चिदाह। कार्यानु[redacted]तान्वयव्यतिरेकिकारणमि
ति। तदयुक्तं। नित्यविभूनांव्योमादीनांकालतोदेशतश्चव्यतिरेकासंभवेनाकारणत्वप्रसंगात्। तच्चकारणंत्रिविधं। सं ण७
समवाय्यसमवायिनिमित्तभेदात्। तत्रयत्समवेतंकार्यमुत्पद्यतेतत्समवायिकारणं। यथातंतवःपटस्यसमवा
यिकारणं। तंतुष्वेवहिपटःसमवेतोजायतेनतुर्यादिषु। ननुतंतुसंबंधस्तुर्यादिसंबंधोपिपटस्यविद्यते॥
तत्कथं। तंतुष्वेवहिपटःसमवेतोजायतेनतुतुर्यादिषु। सत्यं। द्विविधःसंबंधःसंयोगःसमवायश्चेति। तत्रा
युतसिद्धयोःसंबंधःसमवायः। अन्ययोस्तुसंयोगएव। कौपुनरयुतसिद्धौ। ययोर्मध्येएकमविनश्यद

पराश्रितमेवावतिष्ठेते तावेवायुतसिद्धौ। तदुक्तं। तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययोर्द्वयोः। अवश्यमेकमपराश्रित
मेवावतिष्ठते। यथावयवावयविनौ गुणक्रियावंतौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति। अवयवाद्यो हि यथाक्र
व३ ममवयवाद्याश्रितमेवावतिष्ठंते ऽविनश्यंतः। विनश्यदवस्थास्त्वनाश्रिता अवयव्यादयो ऽवतिष्ठंते। य
थातंतुनाशे सति पटो। यथा वाश्रयनाशे सति गुणः। विनश्यतां तु विनाशकारणसामग्रीसांनिध्यं॥
तंतुपटावयवावयविनौ। तेनानयोः संबंधः समवायः। अयुतसिद्धत्वात्। तुरीपटयोस्तु न समवा
यः। अयुतसिद्धत्वाभावात्। नहि तुरीपटाश्रितैवावतिष्ठते। नापि पटस्तु तयाश्रितः। अतस्तयोः संयो
ग एव। तदेवं। तंतुसमवेतः पटः। यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं। अतस्तंतुरेव समवा
यिकारणं। नतु तुर्यादि। पटश्च स्वगतरूपादेः समवायिकारणं। एवं मृत्पिंडोपि घटस्य समवायि
कारणं। घटश्च स्वगतरूपादेः। ननु यदैव घटादयो जायंते तदैव तद्गतरूपादयोपि जायंते। ततः स
मानकालीनतया गुणगुणिनोः सव्येतरगोविषाणवत् कार्यकारणभाव एव नास्ति। पौर्वापर्याभावा २

भावात्। अतो रूपादीन्प्रति न समवायिकारणत्वं घटादीनां। कारणविशेषत्वात् समवायिकारण
स्य। अत्रोच्यते। न गुणगुणिनोः समानकालीनं जन्म किंतु द्रव्यं निर्गुणमेव प्रथममुत्पद्यते पश्चा
त्तत्समवेता गुणा उत्पद्यंते समानकालोत्पत्तौ गुणगुणिनोः समानसामग्रीकत्वादभेदो न
स्यात्। कारणभेदनियतत्वात् कार्यभेदस्य। तस्मात् प्रथमक्षणे निर्गुण एव घटो गुणेभ्यः पूर्वभा
वीति भवति गुणानां कारणं। तदा कारणभेदोपपत्तिः। घटो हि घटं प्रति न कारणमेकस्यैव पूर्वाप
र्याभावात्। नहि सदेव तमेव प्रति पूर्वभावी पश्चाद्भावी च। स च गुणान्प्रति पूर्वभावित्वाद्भवति
गुणानां कारणं। नन्वेवं सति प्रथमे क्षणे घटो ऽचाक्षुषः स्यात् रूपादिरहितत्वात् वायुवत्। त
देव हि द्रव्यं चाक्षुषं यन्महत्त्वे सत्युद्भूतरूपवत्। अद्रव्यं च स्यात् गुणाश्रयत्वाभावात्। गुणाश्रयो हि
द्रव्यमिति द्रव्यलक्षणं। सत्यं। प्रथमे क्षणे परमसत्ये यदि घटे ऽचाक्षुषत्वमापद्यते तदा का नो हा

त्तिः स्यात्। न हि सगुणोत्पत्तिपक्षेऽपि निमेषावसरे घटश्चक्षुषा गृह्यते। तेन व्यवस्थितमेवैतत् निर्गुण एवघटः। प्रथममुत्पद्यते द्वितीयादिक्षणेषु रूपोत्पत्तौ चक्षुषा गृह्यते। न च प्रथमक्षणे द्रव्यत्वापत्तिः। समवायिकारणं द्रव्यमिति द्रव्यलक्षणयोगात् यौगपद्यतया गुणाश्रयत्वाच्च। असमवायिकारणं तदुच्यते। यत्समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यं तदसमवायिकारणं। यथा तंतुसंयोगः पटस्यासमवायिकारणं। तंतुसंयोगस्य गुणस्य पटसमवायिकारणेषु तंतुषु समवेतत्वेन समवायिकारण पु५
णप्रत्यासन्नत्वात् न तथास्ति द्रव्यत्वेन पटं प्रति कारणत्वाच्च। एवं तंतुरूपं पटगतरूपस्यासमवायिकारणं। ननु पटगतरूपस्य पटः समवायिकारणं। तेन तस्यैव रूपस्य चिद्धर्मस्य पटं प्रत्यसमवायिकारणत्वमुचितं तस्य समवायिकारणप्रत्यासन्नत्वात्। ननु तंतुगतपटस्य रूपस्य। समवायिकारणप्रत्यासत्यभावात्। मैवं। तत्समवायिकारणसमवायिकारणप्रत्यासन्नत्वस्यापि परंप ३

रया समवायिकारणप्रत्यासन्नत्वात्। निमित्तकारणं तदुच्यते। यत्र समवायिकारणं नाप्यसमवायिकारणमथ च कारणं। यथा तुरीवेमादिकं पटस्य निमित्तकारणं। तदेतत् भावानामेव त्रिविधं कारणं। अ
तु३ भावस्य निमित्तकारणमात्रं तस्य कुत्रचिदप्यसमवायात्। समवायस्य च भावद्वयधर्मत्वात्। तदेतस्य त्रिविधकारणमध्ये यदेव कथमपि सातिशयं तदेव करणं तेन व्यवस्थितमेतत् लक्षणं। प्रमाकरणं प्रमाणमिति। यत्तु अधिगतार्थगंतृ प्रमाणमिति लक्षणं। तन्न। एकस्मिन्नेव घटे घटोऽयं घटोऽयमिति धारावाहिकज्ञानानां गृहीतग्राहिणामप्रमाणप्रसंगात्। न चान्यान्यक्षणलवविशिष्टविषयकरणादनधिगतार्थगंतृता। प्रत्यक्षेण सूक्ष्मकालभेदानाकलनात्। नेदृग्रहे हि क्रियादिसंयोगानां चतुर्णां यौगपद्यात् प्रमाणोत्पत्तिः स्यात्। ननु प्रमायाः करणानि बहूनि प्रमातृप्रमेयादीनि तान्यपि किं करणानि उत नेति। उच्यते सत्यपि प्रमातरि प्रमेये च प्रमानुत्पत्तेः। इंद्रियसंयोगादौ तु स

नविलंबेन प्रमोत्पत्तेरिंद्रियसंयोगादिरेव करणं। साधकत्वविशेषस्यानेनैवोत्कर्षेणास्य प्रमात्रादिभ्योऽतिश
यितत्वात्। अतिशयितं च साधकं साधकतमं तदेव करणमित्युक्तं प्रागेव। अत इंद्रियसंयोगादिरेव कर
णत्वात्प्रमाणं न प्रमात्रादि। तानि च प्रमाणानि चत्वारि। तथा च न्यायसूत्रं। प्रत्यक्षानुमानोपमानश
ब्दाः प्रमाणानीति। किं तत्प्रत्यक्षं। साक्षात्कारिप्रमायाः करणं प्रत्यक्षं। साक्षात्कारिणी च प्रमा सैवोच्य
ते या इंद्रियजा। सा द्विविधा। सविकल्पकनिर्विकल्पकभेदात्। तस्याः करणं त्रिविधं। कदाचिदिंद्रियं
कदाचिदिंद्रियार्थसंन्निकर्षः। कदाचिज्ज्ञानं। कदा पुनरिंद्रियं करणं। उच्यते यदा निर्वि
कल्पकरूपा प्रमा फलं। तथाहि। आत्मा मनसा संयुज्यते मन इंद्रियेण इंद्रियमर्थेन इंद्रियाणां वस्तु
प्राप्यप्रकाशकारित्वनियमात्। ततोऽर्थसंन्निकृष्टेनेंद्रियेण निर्विकल्पकं नाम जात्यादियो ४
जनारहितं वस्तुमात्रावगाहि किंचिदिदमिति ज्ञानं उत्पद्यते तस्य ज्ञानस्य इंद्रियं करणं। छिदायाः

दि२ उच्यते१ इव परशोरिंद्रियार्थसंन्निकर्षोऽवांतरव्यापारः

अयुतसिद्धत्वाभावात्। एवं मनसांतरेणेंद्रियेण आत्मविषयं ज्ञानं जन्यते अहमिति। तदा मन इंद्रियमात्मार्थः अनयोः संन्निकर्षः सं
यदा१ ज्ञानं १ योग एव १०

छिदाकरणस्य परशोरिव दारुसंयोगः। निर्विकल्पकं ज्ञानं फलं। परशोरिव छिदा। कदा पुनरिंद्रियार्थसंन्निकर्षः
करणं। यदा निर्विकल्पकज्ञानानंतरं सविकल्पकं नाम जात्यादियोजनात्मकं डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमि
ति विशेषणविशेष्यावगाहि ज्ञानमुत्पद्यते तदा इंद्रियार्थसंन्निकर्षः करणं निर्विकल्पं ज्ञानमवांतरव्यापारः।
सविकल्पं ज्ञानं फलं। कदा पुनर्ज्ञानं करणं। यदोक्तसविकल्पानंतरं हानोपादानोपेक्षाबुद्धयो जायंते तदा नि
र्विकल्पकं ज्ञानं करणं। सविकल्पकं ज्ञानमवांतरव्यापारः हानोपादानादिबुद्धयः फलं। कश्चिदाह। स
विकल्पकादौ नामपीन्द्रियमेव करणं। यावंत्यांतरालिकानि संन्निकर्षादीनि संति तानि सर्वाण्यवांतर
व्यापाराः। इंद्रियार्थयोस्तु यः संन्निकर्षः सा। साक्षात्कारिप्रमाहेतुः। षड्विध एव। तद्यथा। संयोगः। संयुक्तस
मवायः। संयुक्तसमवेतसमवायः। समवायः। समवेतसमवायः। विशेषणविशेष्यभावश्चेति। तत्र
यदा चक्षुषा घटविषयं ज्ञानं जन्यते घटोऽयमिति तदा चक्षुरिंद्रियं घटोऽर्थः अनयोः संन्निकर्षः सं
योग एव। यदा घटगतं रूपादिकं गृह्यते घटे श्यामरूपमस्तीति तदा च चक्षुरिंद्रियं घटगतरूपमर्थः

आषा॰म॰

या

अनयोः संनिकर्षः संयुक्तसमवाय एव। चक्षुः संयुक्ते घटे श्याम रूपमस्तीति तदा चक्षुरिं घटे रूपस्य समवायात्।
एवं मनसात्मसमवेते सुखादौ ग्रह्यमाणे अयमेव संनिकर्षः। घटगतपरिमाणादि ग्रहे चतुष्टयसंनिकर्षोप्यु
षिकं कारणमिष्यते सत्यपि संयुक्तसमवाये तदभावे दूरे परिमाणाद्यग्रहणात्। चतुष्टको संनिकर्षयो यथा।
इंद्रियावयवैरर्थावयवानामिंद्रियावयविनाऽर्थावयवैर्विन इंद्रियावयवैरर्थावयविन इंद्रियावय
विनर्थावयवानां संयोग इति। कथं पुनः संयुक्तसमवेतसमवायः यदा पुनश्चक्षुषा घटरूपादि समवे
सामान्यं गृह्यते तदा चक्षुरिंद्रियं रूपत्वादि सामान्यमित्यर्थः। अनयोः संनिकर्षः समवेतसमवाय एव।
यथा चक्षुः संयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायः। कः पुनः समवायसंनिकर्षः। यदा श्रो
त्रेंद्रियेण शब्दो गृह्यते तदा श्रोत्रमिंद्रियं शब्दोर्थः। अथ अनयोः संनिकर्षः समवाय एव। श्रोत्रस्याका
शत्वात्। शब्दस्य चाकाशगुणत्वात्। गुणगुणिनोश्च समवायात्। कः पुनः समवेतसमवायसं
निकर्षः। यदा शब्दसमवेतं शब्दत्वादिसामान्यं श्रोत्रेंद्रियेण गृह्यते तदा श्रोत्रमिंद्रियं शब्दत्वादिसा ५

घटाभावो।२

मान्यमित्यर्थः। अनयोः संनिकर्षः समवेतसमवाय एव। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। कः
पुनर्विशेषणविशेष्यभावः। इंद्रियार्थयोः संनिकर्षः। यदा चक्षुः संयुक्ते भूतले घटो गृह्यते इह भूतले घटो ना
स्तीति तदा चक्षुः संयुक्तस्य भूतलस्य घटाभावो विशेषणं। यदा मनः संयुक्ते आत्मनि सुखाभावो गृह्यते
ऽहं सुखादिरहित तदा मनः संयुक्तस्यात्मनः सुखाद्यभावो विशेषणं। यदा श्रोत्रसमवेते गकारे घ
त्वाभावो गृह्यते तदा श्रोत्रसमवेतस्य गकारस्य घत्वाभावो विशेषणं। तदेवं संक्षेपतः पंचविधसंबंधान्य
तमसंबद्ध विशेषणविशेष्यभावसंज्ञकेनेंद्रियार्थसंनिकर्षेणाभाव इंद्रियेण गृह्यते। एवं समवा
योपि। चक्षुः संबद्धस्य तंतोर्विशेषणं भूतः पटसमवायो गृह्यते। इह तंतुषु पटसमवाय इति। तदेवं षोढा
संनिकर्षो वर्णितः। संग्रहश्च। अक्षजा प्रमितिर्द्वेधा विकल्पा निर्विकल्पिकाः। करणं त्रिविधं तस्याः
संनिकर्षः स्तु षड्विधः। ननु निर्विकल्पकं परार्थं नः स्वजन्यज्ञानविषयं भवतु प्रत्यक्षं। सविकल्पकं तु
शब्दलिंगवदनुगम्याकाराग्राह। वस्तुतिग्राहित्वात् सामान्यविषयं। स्वलक्षणमनंतं। कथं प्रत्यक्षं। अ

त.क.भाषा.मू.

जस्यैव प्रत्यक्षत्वादर्थस्य च परमार्थतः सत एव जनकत्वात् । स्वलक्षणं तु परमार्थतः सत् न तु सामान्यं । त
स्य प्रमाणेन निरस्तविधिभावस्यान्यव्यावृत्त्यात्मनस्तुच्छत्वात् । मैवं । सामान्यस्य वस्तुभूतत्वात् । तदेवं व्याख्या
तं प्रत्यक्षं ॥ श्री ॥ लिंगपरामर्शोनुमानं । तद्धि धूमादिज्ञानमनुमितिज्ञानकरणत्वात् । अग्न्यादिज्ञानम
नुमितिस्तत्करणं हि धूमादिज्ञानं । किं पुनर्लिंगं । कश्च तस्य परामर्शः । उच्यते । व्याप्तिबलेनार्थग
मकं तत्तस्य लिंगं । यथा धूमोग्नेर्लिंगं । तथाहि । यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः । तस्यां
गृहीतायामेव धूमोऽग्निं गमयति । अतो व्याप्तिबलेनार्थानुमापकत्वात् तस्य धूमोग्नेर्लिंगं । तृतीयं ज्ञा
नं लिंगपरामर्शः । तथाहि । प्रथमं तावन्महानसादौ भूयो भूयो धूमं पश्यन् वह्निं पश्यति । तेन भूयो दर्श
मद्य३ नेन धूमाग्न्योः स्वाभाविकं संबंधं धारयति । यत्र धूमस्तत्राग्निरिति । यद्यपि यत्र मैत्रीतनयत्वं तत्र श्या
मत्वमपीति भूयोदर्शनं समानं । सत्यं । तथापि मैत्रीतनयत्वश्यामत्वयोर्न स्वाभाविकः संबंधः । किं त्वौ
पाधिक एव । शाकाद्याहारपरिणामस्योपाधेर्विद्यमानत्वात् । तथाहि श्यामत्वे मैत्रीतनयत्वं न प्रयो ६

जकत्वं किं तु शाकाद्यन्नपरिणतिभेद एव प्रयोजकः । प्रयोजकश्चोपाधिरित्युच्यते । न च धूमाग्न्योः संबंधे कश्चि
दुपाधिरस्ति । अस्ति चेत् योग्योऽयोग्यो वा । अयोग्यस्य शंकितुमशक्यत्वात् । योग्यस्य चानुपलभ्यमानत्वात् ।
यत्रोपाधिरस्ति तत्रोपलभ्यते । यथाग्नेर्धूमसंबंधे आर्द्रेंधनसंयोगः । हिंसात्वस्य चाधर्मसाधनत्वेन सह
संबंधे निषिद्धत्वमुपाधिः । मैत्रीतनयत्वस्य च श्यामत्वेन संबंधे शाकाद्याहारपरिणतिभेदः । न चेह धू
मस्याग्निसाहचर्ये कश्चिदुपाधिरस्ति । यद्यभविष्यत् तदद्रक्ष्यत । ततो दर्शनाभावान्नास्तीति तर्कसहका
रिणा अनुपलंभसनाथेन प्रत्यक्षेणैवोपाध्यभावोऽवधार्यते । तथा ह्युपाध्यभावग्रहणजनितसंस्कारस
जनितसं हकृतेन भूयोदर्शनसंस्कारसहकृतेन साहचर्यग्राहिणा प्रत्यक्षेण धूमाग्न्योर्व्याप्तिरव
धार्यते । तेन धूमाग्न्योः स्वाभाविक एव संबंधो न त्वौपाधिकः । स्वाभाविकश्च संबंधो व्याप्तिरित्युच्यते । त
दनेन न्यायेन धूमाग्न्योर्व्याप्तिग्राहकप्रमाणगोचरं महानसे यद्धूमज्ञानं तत्प्रथमं । पर्वतादौ पक्षे यद्धूमज्ञानं
तद्द्वितीयं । ततः पूर्वगृहीतां व्याप्तिं स्मृत्वा तत्रैव पर्वते पुनर्धूमं परामृशति । अस्त्यत्र पर्वते अ

ग्निव्याप्तो धूम इति। तदिदं धूमज्ञानं तृतीयं। एतच्चावश्यमभ्युपेयम्। अन्यथा यत्र धूमस्तत्राग्निरिति
चस्मादि ज्ञातुक धूमग्निनात्र वितव्यं। तस्मादिहापि धूमोऽस्तीति ज्ञानमन्वेषणीयम्। अयमेव लिं
गपरामर्शो ऽनुमितिकरणत्वाच्चानुमानं। तस्माद्वस्तुतः पर्वतेऽग्निरित्यनुमितिज्ञानमुत्पद्यते। न
नु यत्र धूमं महानसे धूमज्ञानं तत्राग्न्यनुमापकं। सत्यं। आग्नेरगृहीतत्वात्। गृहीतायामेव व्या
प्तावग्निनुपलब्धात्। अथ व्याप्तिनिश्चयोत्तरकालं महानस एवाग्निरनुमीयतां। मैवम्। अग्ने
र्दृष्टत्वेन संदेहाभावात्। संदिग्ध एवार्थोऽनुमीयते। तथा चोक्तं। नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्र भोजप्र इला
वर्त्तते। अपि तु संदिग्धेऽर्थे इति। अथ पर्वतगतमात्रस्य पुंसो यद्धूमज्ञानं तत्कथं नाग्निमनुमाप
यति। अस्ति चाग्निसंदेहः साधकबाधकप्रमाणाभावेन संशयस्य न्यायप्रागत्वात्। सत्यम्।
अगृहीतव्याप्तेरिव गृहीतविस्मृतव्याप्तेरपि पुंसोऽनुमानानुदयेन व्याप्तिस्मृतेरप्यनुमितिहे
तुत्वात् धूमदर्शनाच्च व्याप्तिं स्मरति। यो यो धूमवान् स सोऽग्निमान् यथा महानस ७

इति। तेन धूमदर्शने जाते व्याप्तिस्मरणे जातायां ततः। यो यद्धूमज्ञानं तृतीयं धूमवां त्वयति। तदेवाग्निम
नुमापयति नान्यत्। तदेव लिंगपरामर्शः। तेन व्यवस्थितमेतत् लिंगपरामर्शोऽनुमानमिति लक्षणम्। तच्चा
नुमानं द्विविधं। स्वार्थं परार्थं चेति। स्वमतिहेतुः स्वार्थं। तथा हि। स्वयमेव महानसादौ विशिष्टेन प्रत्यक्षेण
धूमाग्न्योर्व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ संदिहानः पर्वतवर्त्तिनीमविच्छिन्नमूलामभ्रं
लिहां धूमलेखां पश्यन्। धूमदर्शनोद्बुद्धसंस्कारो व्याप्तिं स्मरति। यत्र धूमस्तत्राग्निरिति। अत्रापि धू
मोऽस्तीति प्रतिपद्यते। तस्मादत्र पर्वतेऽग्निरस्तीति स्वयमेव प्रतिपद्यते तत्स्वार्थानुमानं। यत्तु कश्चित्स्व
यमग्निमनुमाय परं बोधयितुं यत् पंचावयववाक्यं प्रयुंक्ते तत्परार्थानुमानं। तद्यथा। पर्वतोऽग्निमान्
धूमवत्त्वात्। यो यो धूमवान् सोऽग्निमान्। यथा महानसः। तथा चायं तस्मात्तथेति। अनेन वा
क्येन प्रतिपादितात् पंचरूपोपपन्नात् लिंगात् परोऽप्यग्निं प्रतिपद्यते। तेनैतत् परार्थानुमानम्। अत्र च प

र्वतस्याग्निमत्त्वं साध्यं धूमवत्त्वं हेतुः। स चान्वयव्यतिरेकी। अन्वयेन व्यतिरेकेण च व्याप्ते र्विद्यमानत्वा
त्। तथाहि। यत्र धूमस्तत्राग्निर्यथा महानसे इत्यन्वयव्याप्तिर्महानसे धूमाग्न्योरन्वयसद्भावस्य दर्शना
त्॥ एवं यत्राग्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिर्महाह्रदे धूमाग्न्योर्व्य
तिरेकभावस्य दर्शनात्। व्यतिरेकव्याप्तेरयं क्रमः। अन्वयव्याप्तौ यद्व्याप्यं तदभावो ऽव्यापकः। अन्च यत्र अत्र
व्यापकं तदभावो ऽत्र व्याप्य इति। धूमो व्याप्यो व्यापकोऽग्निरिति। व्याप्यं तु गमकं प्रोक्तं व्यापकं गम्यमिष्यते।
तदुक्तम्। व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते। तयोरभावयोर्यस्माद्विपरीतः प्रतीयते। अन्व
ये साधनं व्याप्यं साध्यं व्यापकमिष्यते ॥२॥ साध्याभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः॥ व्याप्यस्य
वचनं पूर्वं व्यापकस्य ततः परम्। एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः॥३॥ तदेवं धूमे हेतौ अन्व
येन व्यतिरेकेण च व्याप्तिरस्ति। यत्तु वाक्ये केवलान्वयव्याप्तिरेव प्रदर्श्यते तदेकेनापि चरितार्थ ८